# AngArakastotraM

# ઋણમોચન અઙ્ગારકસ્તોત્રમ્

## Document Information

Text title : aNgArakastotram

File name : angArakastotram.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Description-comments : From Grantha/Tamil book Adityadi Navagraha Stotra

Latest update : November 19, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 23, 2022

*sanskritdocuments.org*

# ઋણમોચન અઙ્ગારકસ્તોત્રમ્

। શ્રીરસ્તુ ।

શ્રીપરમાત્મને નમઃ ।

અથ ઋણગ્રસ્તસ્ય ઋણવિમોચનાર્થં અઙ્ગારકસ્તોત્રમ્ ।

સ્કન્દ ઉવાચ ।

ઋણગ્રસ્તનરાણાં તુ  ઋણમુક્તિઃ કથં ભવેત્ ।

બ્રહ્મોવાચ ।

વક્ષ્યેઽહં સર્વલોકાનાં હિતાર્થં હિતકામદમ્ ।

અસ્ય શ્રી અઙ્ગારકમહામન્ત્રસ્ય ગૌતમ ઋષિઃ । અનુષ્ટુપ્છન્દઃ ।

અઙ્ગારકો દેવતા । મમ ઋણવિમોચનાર્થે  અઙ્ગારકમન્ત્રજપે વિનિયોગઃ ।

ધ્યાનમ્ ।

રક્તમાલ્યામ્બરધરઃ શૂલશક્તિગદાધરઃ ।

ચતુર્ભુજો મેષગતો વરદશ્ચ ધરાસુતઃ ॥ ૧॥

મઙ્ગલો ભૂમિપુત્રશ્ચ ઋણહર્તા ધનપ્રદઃ ।

સ્થિરાસનો મહાકાયો સર્વકામફલપ્રદઃ ॥ ૨॥

લોહિતો લોહિતાક્ષશ્ચ સામગાનાં કૃપાકરઃ ।

ધરાત્મજઃ કુજો ભૌમો ભૂમિદો ભૂમિનન્દનઃ ॥ ૩॥

અઙ્ગારકો યમશ્ચૈવ સર્વરોગાપહારકઃ ।

સૃષ્ટેઃ કર્તા ચ હર્તા ચ સર્વદેશૈશ્ચ પૂજિતઃ ॥ ૪॥

એતાનિ કુજનામાનિ નિત્યં યઃ પ્રયતઃ પઠેત્ ।

ઋણં ન જાયતે તસ્ય શ્રિયં પ્રાપ્નોત્યસંશયઃ ॥ ૫॥

અઙ્ગારક મહીપુત્ર ભગવન્ ભક્તવત્સલ ।

નમોઽસ્તુ તે મમાશેષં ઋણમાશુ વિનાશય ॥ ૬॥

રક્તગન્ધૈશ્ચ પુષ્પૈશ્ચ ધૂપદીપૈર્ગુડોદનૈઃ ।

મઙ્ગલં પૂજયિત્વા તુ મઙ્ગલાહનિ સર્વદા ॥ ૭॥

એકવિંશતિ નામાનિ પઠિત્વા તુ તદન્તિકે ।
ઋણરેખા પ્રકર્તવ્યા અઙ્ગારેણ તદગ્રતઃ ॥ ૮॥

તાશ્ચ પ્રમાર્જયેન્નિત્યં વામપાદેન સંસ્મરન્ ।
એવં કૃતે ન સન્દેહઃ ઋણાન્મુક્તઃ સુખી ભવેત્ ॥ ૯॥

મહતીં શ્રિયમાપ્નોતિ ધનદેન સમો ભવેત્ ।
ભૂમિં ચ લભતે વિદ્વાન્ પુત્રાનાયુશ્ચ વિન્દતિ ॥ ૧૦॥

મૂલમન્ત્રઃ।
અઙ્ગારક મહીપુત્ર ભગવન્ ભક્તવત્સલ ।
નમસ્તેઽસ્તુ મહાભાગ ઋણમાશુ વિનાશય ॥ ૧૧॥

અર્ઘ્યમ્ ।
ભૂમિપુત્ર મહાતેજઃ સ્વેદોદ્ભવ પિનાકિનઃ ।
ઋણાર્થસ્ત્વાં પ્રપન્નોઽસ્મિ ગૃહાણાર્ઘ્યં નમોઽસ્તુ તે ॥ ૧૨॥

ઇતિ ઋણમોચન અઙ્ગારકસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*AngArakastotraM*
pdf was typeset on June 23, 2022

Please send corrections to *sanskrit@cheerful.com*